## व्याहरति मृगः । (५१/१४२६)

तत्र इत्येव, कालात् इति च । [1]कालवाचिनः सप्तमीसमर्थात् प्रातिपदिकात् व्याहरति [2]मृगः इत्येतस्मिन् [3]विषये यथाविहितं प्रत्ययो भवति । निशायां व्याहरति मृगः नैशः, नैशिकः । प्रादोषः, प्रादोषिकः[4] । मृगः इति किम् ? निशायां व्याहरति उलूकः ॥

## तदस्य सोढम् । (५२/१४२७)

कालात् इत्येव । तद् इति प्रथमासमर्थात् कालवाचिनः प्रातिपदिकात् अस्य इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत् प्रथमासमर्थं सोढं चेत्तद्भवति । सोढं जितमभ्यस्तम् इत्यर्थः । निशासहचरितमध्ययनं निशा, तत् सोढमस्य छात्रस्य नैशः, नैशिकः । प्रादोषः, प्रादोषिकः ॥

## तत्र भवः । (५३/१४२८)

कालात् इति निवृत्तम् । तत्र इति सप्तमीसमर्थात् ङ्याप्प्रातिपदिकात् भवः इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । सत्ता [5]भवत्यर्थो गृह्यते, न जन्म, 'तत्र जातः' (४.३.२५/१३९३) इति [6]गतार्थत्वात् । स्रुघ्ने भवः स्रौघ्नः । [7]माथुरः । [8]राष्ट्रियः । [9]पुनस्तत्रग्रहणं तदस्य इति निवृत्त्यर्थम् ॥

## दिगादिभ्यो यत् । (५४/१४२९)

दिश् इत्येवमादिभ्यः प्रातिपदिकेभ्यः यत् प्रत्ययो भवति तत्र भवः इत्येतस्मिन् [10]विषये । [11]अणश्छस्य चापवादः । दिशि भवम् दिश्यम् । वर्ग्यम् । मुखजघनशब्दयोरशरीरावयवार्थः[12] पाठः, [13]सेनामुख्यम्, सेनाजघन्यम् इति[14] ।

दिश् । वर्ग । [15]पूग । [16]गण । पक्ष । [17]धाय्या । मित्र । मेधा । अन्तर । पथिन् । रहस् । अलीक । [18]उखा । साक्षिन् । आदि । अन्त । मुख । जघन । मेघ । यूथ । 'उदकात् सञ्ज्ञायाम्' (ग.सू. १०५)[19] । न्याय । वंश । अनुवंश । [20]विश । काल । अप् । आकाश । दिगादिः ॥

## शरीरावयवाच्च । (५५/१४३०)

[21]शरीरं प्राणिकायः । शरीरावयववाचिनः प्रातिपदिकाद् यत्प्रत्ययो भवति तत्र भवः इत्येतस्मिन् [22]विषये । अणोऽपवादः । दन्तेषु भवं दन्त्यम् । [23]कर्ण्यम् । [24]ओष्ठ्यम् ॥

---

1. तत्र इत्यधिकम् ह. 2. मृगः नास्ति ब. 3. अर्थे ब. क. इ. फ. ह. 4. निशाप्रदोषाभ्यां वा ठक् इत्यधिकम् ब. 5. भवार्थे फ. 6. गतत्वात् ह. 7. माधुरः ड, माथरः ब. 8. राष्ट्रीयः फ.ह. 9. वाक्यमिदं नास्ति ब. 10. अर्थे ब.फ. 11. अणुछयोः इ. ह. 12. इह इत्यधिकम् फ. ह. 13. सेनामुख्यः, सेनाजघन्यः ह, सेनायाः मुखं, सेनायाः जघनम् ब. 14. मुखजघनाभ्यां सेनायाः अग्रभागपश्चाद्भागौ उच्येते इत्यधिकम् ब. 15. नास्ति फ. 16. ग्रहण क. 17. धाष्ट्या क. 18. उखा, साक्षिन् नास्ति फ. 19. उदक्या रजस्वला । संज्ञायामिति किम् ? औदको मत्स्यः इत्यधिकम् ब.क.ड.ह. 20. वेश क.ड. 21. शरीरं प्राणिकायः नास्ति क.फ. 22. अर्थे फ.ह. 23. कण्ठ्यम् ड. 24. नास्ति इ.ह.